मार्कण्डेयपुराणम्/अध्यायः ६१-६५



Exported from Wikisource on २३ जनवरीमासः २०२४

61(58) एकषष्टितमोऽध्यायः- ६१

क्रौष्टुकिरुवाच

कथितं भवता सम्यग् यत् पृष्टोऽसि महामुने ।
भूसमुद्रादिसंस्थानं प्रमाणानि तथा ग्रहाः ॥६१.१ ॥

तेषाञ्चैव प्रमाणञ्च नक्षत्राणाञ्च संस्थितिः ।
भूरादयस्तथा लोकाः पातालान्यखिलान्यपि ॥६१.२ ॥

स्वायम्भुवं तथा ख्यातं मुने ! मन्वन्तरं मम ।
तदन्तराण्यहं श्रोतुमिच्छे मन्वन्तराणि वै ।
मन्वन्तराधिपान् देवानृषींस्तत्तनयान्नृपान् ॥६१.३ ॥

मार्कण्डेय उवाच

मन्वन्तरं मयाख्यातं तव स्वायम्भुवं च यत् ।
स्वारोचिषाख्यमन्यत् तु शृणु तस्मादनन्तरम् ॥६१.४ ॥

कश्चिद् द्विजातिप्रवरः पुरेऽभूदरुणास्पदे ।
वरुणायास्तटे विप्रो रूपेणात्यश्विनावपि ॥६१.५ ॥

मृदुस्वभावः सद्वृत्तो वेदवेदाङ्गपारगः ।
सदातिथिप्रियो रात्रावागतानां समाश्रयः ॥६१.६ ॥

तस्य बुद्धिरियं त्वासीदहं पश्ये वसुन्धराम् ।
अतिरम्यवनोद्यानां नानानगरशोभिताम् ॥६१.७ ॥

अथागतो ।ऽतिथिः कश्चित् कदाचित्तस्य वेश्मनि ।
नानौषधिप्रभावज्ञो मन्त्रविद्याविशारदः ॥६१.८ ॥

अभ्यर्थितस्तु तेनासौ श्रद्धापूतेन चेतसा ।
तस्याचख्यौ स देशांश्च रम्याणि नगराणि च ॥६१.९ ॥

वनानि नद्यः शैलांश्च पुण्यान्यायतनानि च ।
स ततो विस्मयाविष्टः प्राह तं द्विजसत्तमम् ॥६१.१० ॥

अनेकदेशदर्शित्वेनातिश्रमसमन्वितः ।
त्वं नातिवृद्धो वयसा नातिवृत्तश्च यौवनात् ।
कथमल्पेन कालेन पृथिवीमटसि द्विज ॥६१.११ ॥

ब्राह्मण उवाच

मन्त्रौषधिप्रभावेण विप्राप्रतिहता गतिः ।
योजनानां सहस्रं हि दिनार्धेन व्रजाम्यम् ॥६१.१२ ॥

मार्कण्डेय उवाच

ततः स विप्रस्तं भूयः प्रत्युवाचेदमादरात् ।
श्रद्धधानो वचस्तस्य ब्राह्मणस्य विपश्चितः ॥६१.१३ ॥

मम प्रसादं भगवन् ! कुरु मन्त्रप्रभावजम् ।
द्रष्टुमेतां मम महीमतीवेच्छा प्रवर्तते ॥६१.१४ ॥

प्रादात् स ब्राह्मणश्चास्मै पादलेपमुदारधीः ।
अभिमन्त्रयामास दिशं तेनाख्याताञ्च यत्नतः ॥६१.१५ ॥

तेनानुलिप्तपादोऽथ स द्विजो द्विजसत्तम ।
हिमवन्तमगाद् द्रष्टुं नानाप्रस्त्रवणान्वितम् ॥६१.१६ ॥

सहस्रं योजनानां हि दिनार्धेन व्रजामि यत् ।
आयास्यामीति सञ्चिन्त्य तदर्धेनापरेण हि ॥६१.१७ ॥

सम्प्राप्तो हिमवत्पृष्ठं नातिश्रान्ततनुर्द्विज ।
विचचार ततस्तत्र तुहिनाचलभूतले ॥६१.१८ ॥

पादाक्रान्तेन तस्याथ तुहिनेन विलीयता ।
प्रक्षालितः पादलेपः परमौषधिसम्भः ॥६१.१९ ॥

ततो जडगतिः सोऽथ इतश्चेतश्च पर्यटन् ।
ददर्शातिमनोज्ञानि सानूनि हिमभूभृतः ॥६१.२० ॥

सिद्धगन्धर्वजुष्टानि किन्नराभिरतानि च ।
क्रीडाविहाररम्याणि देवादीनामितस्ततः ॥६१.२१ ॥

दिव्याप्सरोगणशतैराकीर्णान्यवलोकयन् ।
नातृप्यत द्विजश्रेष्ठः प्रोद्भूतपुलको मुने ॥६१.२२ ॥

क्वचित् प्रस्त्रवणाद् भ्रष्टजलपातमनोरमम् ।
प्रनृत्यच्छिखिकेकाभिरन्यतश्च निनादितम् ॥६१.२३ ॥

दात्यूहकोयष्टिकाद्यैः क्वचिच्चातिमनोहरैः ।
पुंस्कोकिलकलालापैः श्रुतिहारिभिरन्वितम् ॥६१.२४ ॥

प्रफुल्लतरुगन्धेन वासितानिलवीजितम् ।
मुदा युक्तः स ददृशे हिमवन्तं महागिरिम् ॥६१.२५ ॥

दृष्ट्वा चैतं द्विजसुतो हिमवन्तं महाचलम् ।
श्वो द्रक्षयामीति संचिन्त्य मतिञ्चक्रे गृहं प्रति ॥६१.२६ ॥

विभ्रष्टपादलेपोऽथ चिरेण जडितक्रमः ।
चिन्तयामास किमिदं मयाज्ञानादनुष्ठितम् ॥६१.२७ ॥

यदि प्रलेपो नष्टो मे विलीनो हिमवारिणा ।
शैलोऽतिदुर्गमश्चायं दूरञ्चाहमिहागतः ॥६१.२८ ॥

प्रयास्यामि क्रियाहानिमग्निशुश्रूषणादिकम् ।
कथमत्र करिष्यामि सङ्कटं महदागतम् ॥६१.२९ ॥

इदं रम्यमिदं रम्यमित्यस्मिन् वरपर्वते ।
शक्तदृष्टिरहं तृप्तिं न यास्येऽब्दशतैरपि ॥६१.३० ॥

किन्नराणां कलालापाः समन्ताच्छ्रोत्रहारिणः ।
प्रफुल्लतरुगन्धांश्च घ्राणमत्यन्तमृच्छति ॥६१.३१ ॥

सुखस्पर्शस्तथा वायुः फलानि रसवन्ति च ।
हरन्ति प्रसभं चेतो मनोज्ञानि सरांसि च ॥६१.३२ ॥

एवं गते तु पश्येयं यदि कञ्चित् तपोनिधिम् ।
स ममोपदिशेन्मार्गं गमनाय गृहं प्रति ॥६१.३३ ॥

मार्कण्डेय उवाच

स एवं चिन्तयन् विप्रो बभ्राम च हिमाचले ।
भ्रष्टपादौषधिबलो वैक्लवं परमं गतः ॥६१.३४ ॥

तं ददर्श भ्रमन्तञ्च मुनिश्रेष्ठं वरूथिनी ।
वराप्सरा महाभागा मौलेया रूपशालिनी ॥६१.३५ ॥

तस्मिन् दृष्टे ततः साभूद् द्विजवर्ये वरूथिनी ।
मदनाकृष्टहृदया सानुरागा हि तत्क्षणात् ॥६१.३६ ॥

चिन्तयामास को न्वेष रमणीयतमाकृतिः ।
सफलं मे भवेज्जन्म यदि मां नावमन्यते ॥६१.३७ ॥

अहोऽस्य रूपमाधुर्यमहोऽस्य ललिता गतिः ।
अहो गम्भीरता दृष्टेः कुतोऽस्य सदृशो भुवि ॥६१.३८ ॥

दृष्टा देवास्तथा दैत्याः सिद्धगन्धर्वपन्नगाः ।
कथमेकोऽपि नास्त्यस्य तुल्यरूपो महात्मनः ॥६१.३९ ॥

यथाहमस्मिन्मय्येष सानुरागस्तथा यदि ।
भवेदत्र मया कार्यस्तत्कृतः पुण्यसञ्चयः ॥६१.४० ॥

यद्येष मयि सुस्निग्धां दृष्टिमद्य निपातयेत् ।
कृतपुण्या न मत्तोऽन्या त्रैलोक्ये वनिता ततः ॥६१.४१ ॥

मार्कण्डेय उवाच

एवं सञ्चिन्तयन्ती सा दिव्ययोषित् स्मरातुरा ।
आत्मानं दर्शयामास कमनीयतराकृतिम् ॥६१.४२ ॥

तान्तु दृष्ट्वा द्विजसुतश्चारुरूपां वरूथिनीम् ।
सोपचारं समागम्य वाक्यमेतदुवाच ह ॥६१.४३ ॥

का त्वं कमलगर्भाभे कस्य किं वानुतिष्ठसि ।
ब्राह्मणोऽहमिहायातो नगरादरुणास्पदात् ॥६१.४४ ॥

पादलेपोऽत्र मे ध्वस्तो विलीनो हिमवारिणा ।
यस्यानुभावादत्राहमागतो मदिरेक्षणे ॥६१.४५ ॥

वरूथिन्युवाच

मौलेयाहं महाभागा नाम्ना ख्याता वरूथिनी ।
विचरामि सदैवात्र रमणीये महाचले ॥६१.४६ ॥

साहं त्वद्दर्शनाद्विप्र ! कामवक्तव्यताङ्गता ।
प्रशाधि यन्मया कार्यं त्वदधीनास्मि साम्प्रतम् ॥६१.४७ ॥

ब्राह्मण उवाच

येनोपायेन गच्छेयं निजगेहं शुचिस्मिते ।
तन्ममाचक्ष्व कल्याणि हानिर्नोऽखिलकर्मणाम् ॥६१.४८ ॥

नित्यनैमित्तिकानान्तु महाहानिर्द्विजन्मनः ।
भवत्यतस्त्वं हे भद्रे ! मामुद्धर हिमालयात् ॥६१.४९ ॥

प्रशस्यते न प्रवासो ब्राह्मणानां कदाचन ।
अपराद्धं न मे भीरु देशदर्शनकौतुकम् ॥६१.५० ॥

सतो गृहे द्विजाग्र्यस्य निष्पत्तिः सर्वकर्मणाम् ।
नित्यनैमित्तिकानाञ्च हानिरेवं प्रवासिनः ॥६१.५१ ॥

सा त्वं किं बहुनोक्तेन तथा कुरु यशस्विनि ।
यथा नास्तं गेत सूर्ये पश्यामि निजमालयम् ॥६१.५२ ॥

वरूथिन्युवाच

मैवं ब्रूहि महाभाग ! मा भूत्स दिवसो मम ।
मां परित्यज्य यत्र त्वं निजगेहमुपैष्यसि ॥६१.५३ ॥

अहो रम्यतरः स्वर्गो न यतो द्विजनन्दन ।
अतो वयं परित्यज्य तिष्ठामोऽत्र सुरालयम् ॥६१.५४ ॥

स त्वं सह मया कान्त ! कान्तेऽत्र तुहिनाचले ।
रममाणो न मर्त्यानां बान्धवानां स्मरिष्यसि ॥६१.५५ ॥

स्त्रजो वस्त्राण्यलङ्कारान् भोगभोज्यानुलेपनम् ।
दास्याम्यत्र तथाहन्ते स्मरेण वशगा हृता ॥६१.५६ ॥

वीणावेणुस्वनं गीतं किन्नराणां मनोरमम् ।
अङ्गाह्लादकरो वायुरुष्णान्नमुदकं शुचि ॥६१.५७ ॥

मनोभिलषिता शय्या सुगन्धमनुलेपनम् ।
इहासतो महाभाग गृहे किन्ते निजेऽधिकम् ॥६१.५८ ॥

इहासतो नैव जरा कदाचित्ते भविष्यति ।
त्रिदशानामियं भूमिर्यौवनोपचयप्रदा ॥६१.५९ ॥

इत्युक्त्वा सानुरागा सा सहसा कमलेक्षणा ।
आलिलिङ्ग प्रसीदेति वदन्ती कलमुन्मना: ॥६१.६० ॥

ब्राह्मण उवाच

मा मां स्प्राक्षीर्व्रजान्यत्र दुष्टे य: सदृशस्तव ।
मयान्यथा याचिता त्वमन्यथैवाप्युपैषि माम् ॥६१.६१ ॥

सायं प्रातर्हुतं हव्यं लोकान् यच्छति शाश्वतान् ।
त्रैलोक्यमेतदखिलं मूढे इव्ये प्रतिष्ठितम् ॥६१.६२ ॥

वरूथिन्युवाच

किं ते नाहं प्रिया विप्र ! रमणीयो न किं गिरि: ।
गन्धर्वान् किन्नरादींश्च त्यक्त्वाभीष्टो हि कस्तव ॥६१.६३ ॥

निजमालयमप्यस्माद्भवान् यास्यत्यसंशयम् ।
स्वल्पकालं मया सार्धं भुङ्क्ष्व भोगान् सुदुर्लभान् ॥६१.६४ ॥

ब्राह्मण उवाच

अष्टावात्मगुणा ये हि तेषामादौ दया द्विज ।
तां करोषि कथं न त्वं मयि सद्धर्मपालक ॥६१.६६ ॥

त्वद्विमुक्ता न जीवामि तथा प्रीतिमती त्वयि ।
नैतद्वदाम्यहं मिथ्या प्रसीद कुलनन्दन ॥६१.६७ ॥

ब्राह्मण उवाच

यदि प्रीतिमती सत्यं नोपचाराद्ब्रवीषि माम् ।
तदुपायं समाचक्ष्व येन यामि स्वमालयम् ॥६१.६८ ॥

वरूथिन्युवाच

निजमालयमप्यस्माद्भवान् यास्यत्यसंशयम् ।
स्वल्पकालं मया सार्धं भुङ्क्ष्व भोगान् सुदुर्लभान् ॥६१.६९ ॥

ब्राह्मण उवाच

न भोगार्थाय विप्राणां शस्यते हि वरूथिनी ।
इह क्लेशाय विप्राणां चेष्टा प्रेत्याफलप्रदा ॥६१.७० ॥

वरूथिन्युवाच

सन्त्राणं म्रियमाणाया मम कृत्वा परत्र ते ।
पुण्यस्यैव फलं भावि भोगाश्चान्यत्र जन्मनि ॥६१.७१ ॥

एवं च द्वयमप्यत्र तवोपचयकारणम् ।
प्रत्याख्यानादहं मृत्युं त्वञ्च पापमवाप्स्यसि ॥६१.७२ ॥

ब्राह्मण उवाच

परस्त्रियं नाभिलषेदित्युचुर्गुरवो मम ।
तेन त्वां नाभिवाञ्छामि कामं विलप शुष्य वा ॥६१.७३ ॥

मार्कण्डेय उवाच

इत्युक्त्वा स महाभागः स्पृष्ट्वापः प्रयतः शुचिः ।
प्राहेदं प्रणिपत्याग्निं गार्हपत्यमुपांशुना ॥६१.७४ ॥

भगवन् ! गार्हपत्याग्ने योनिस्त्वं सर्वकर्मणाम् ।
त्वत्त आहवनीयोऽग्निर्दक्षिणाग्निश्च नान्यतः ॥६१.७५ ॥

युष्मदाप्यायनाद् देवा वृष्टिशस्यादिहेतवः ।
भवन्ति शस्यादखिलं जगद्भवति नान्यतः ॥६१.७६ ॥

एवं त्वत्तो भवत्येतद्येन सत्येन वै जगत् ।
तथाहमद्य स्वं गेहं पश्येयं सति भास्करे ॥६१.७७ ॥

यथा वै वैदिकं कर्म स्वकाले नोज्झितं मया ।
तेन सत्येन पश्येयं गृहस्थोऽद्य दिवाकरम् ॥६१.७८ ॥

यथा च न परद्रव्ये परदारे च मे मतिः ।
कदाचित् साभिलाषाभूत्तथैतत् सिद्धिमेतु मे ॥६१.७९ ॥

इति श्रीमार्कण्डेयपुराणेठब्राह्मणवाक्यम्ऽ
नामैकषष्टितमोऽध्यायः

62(59)

द्विषष्टितमोऽध्यायः- ६२

मार्कण्डेय उवाच

एवन्तु वदतस्तस्य द्विजपुत्रस्य पावकः ।
गार्हपत्यः शरीरे तु सन्निधानमथाकरोत् ॥६२.१ ॥

तेन चाधिष्ठितः सोऽथ प्रभामण्डलमध्यगः ।
व्यदीपयत तं देशं मूर्तिमानिव हव्यवाट् ॥६२.२ ॥

तस्यास्तु सुतरां तत्र तादृग्रूपे द्विजन्मनि ।
अनुरागोऽभवद्विप्रं पश्यन्त्या देवयोषितः ॥६२.३ ॥

ततः सोऽधिष्ठितस्तेन हव्यवाहेन तत्क्षणात् ।
यथापूर्वं तथा गन्तुं प्रवृत्तो द्विजनन्दनः ॥६२.४ ॥

जगाम च त्वरायुक्तस्तया देव्या निरीक्षितः ।
आदृष्टिपातात्तन्वङ्ग्या निश्वासोत्कम्पिकन्धरम् ॥६२.५ ॥

ततः क्षणेनैव तदा निजगेहमवाप्य सः ।
यथाप्रोक्तं द्विजश्रेष्ठश्चकार सकलाः क्रियाः ॥६२.६ ॥

अथ सा चारुसर्वाङ्गी तत्रासक्तात्ममानसा ।
निश्वासपरमा निन्ये दिनशेषं तथा निशाम् ॥६२.७ ॥

निश्वसन्त्यनवद्याङ्गी हाहेति रुदती मुहुः ।
मन्दभाग्येति चात्मानं निनिन्द मदिरेक्षणा ॥६२.८ ॥

न विहारे न चाहारे रमणीये न वा वने ।
न कन्दरेषु रम्येषु सा बबन्ध तदा रतिम् ॥६२.९ ॥

चकार रममाणे च चक्रवाकयुगे स्पृहाम् ।
मुक्ता तेन वरारोहा निनिन्द निजयौवनम् ॥६२.१० ॥

क्वागताहमिमं शैलं दुष्टदैवबलात्कृता ।
क्व च प्राप्तः स मे दृष्टेर्गोचरं तादृशो नरः ॥६२.११ ॥

यद्यद्य स महाभागो न मे सङ्गमुपैष्यति ।
तत्कामाग्निरवश्यं मां क्षपयिष्यति दुः सहः ॥६२.१२ ॥

रमणीयमभूद्यत्तत्पुंस्कोकिलनिनादितम् ।
तेन हीनन्तदेवैतद्दहतीवाद्य मामलम् ॥६२.१३ ॥

मार्कण्डेय उवाच

इत्थं सा मदनाविष्टा जगाम मुनिसत्तम ।
ववृधे च तदा रागस्तस्यास्तस्मिन् प्रतिक्षणम् ॥६२.१४ ॥

कलिर्नाम्ना तु गन्धर्वः सानुरागो निराकृतः ।
तया पूर्वमभूत्सोऽथ तदवस्थां ददर्श ताम् ॥६२.१५ ॥

स चिन्तयामास तदा किं न्वेषा गजगामिनी ।
निश्वासपवनम्लाना गिरावत्र वरूथिनी ॥६२.१६ ॥

मुनिशापक्षता किंनु केनचित् किं विमानिता ।
वाष्पवारिपरिक्लिन्नमियन्धत्ते यतो मुखम् ॥६२.१७ ॥

ततः स दध्यौ सुचिरं तमर्थं कौतुकात् कलिः ।
ज्ञातवांश्च प्रभावेण समाधेः स यथातथम् ॥६२.१८ ॥

पुनः स चिन्तयामास तद्विज्ञाय मुनेः कलिः ।
ममोपपादितं साधु भाग्यैरेतत्पुराकृतैः ॥६२.१९ ॥

मयैषा सानुरागेण बहुशः प्रार्थिता सती ।
निराकृतवती सेयमद्य प्राप्या भविष्यति ॥६२.२० ॥

मानुषे सानुरागेयं तत्र तद्रूपधारिणि ।
रंस्यते मय्यसन्दिग्धं किं कालेन करोमि तत् ॥६२.२१ ॥

मार्कण्डेय उवाच

आत्मप्रभावेण ततस्तस्य रूपं द्विजन्मनः ।
कृत्वा चचार यत्रास्ते निषण्णा सा वरूथिनी ॥६२.२२ ॥

सा तं दृष्ट्वा वरारोहा किञ्चिदुत्फुल्ललोचना ।
समेत्य प्राह तन्वङ्गी प्रसीदेति पुनः पुनः ॥६२.२३ ॥

त्वया त्यक्ता न सन्देहः परित्यक्ष्यामि जीवितम् ।
तत्राधर्मः कष्टतरः क्रियालोपो भविष्यति ॥६२.२४ ॥

मया समेत्य रम्येऽस्मिन् महाकन्दरकन्दरे ।
मत्परित्राणजं धर्ममवश्यं प्रतिपत्स्यसे ॥६२.२५ ॥

आयुषः सावशेषं मे नूनमस्ति महामते ।
निवृत्तस्तेन नूनं त्वं हृदयाह्लादकारकः ॥६२.२६ ॥

कलिरुवाच

किं करोमि क्रियाहानिर्भवत्यत्र सतो मम ।
त्वमप्येवंविधं वाक्यं ब्रवीषि तनुमध्यमे ॥६२.२७ ॥

तदहं सङ्कटं प्राप्तो यद्ब्रवीमि करोषि तत् ।
यदि स्यात् सङ्गमो मेऽद्य भवत्या सह नान्यथा ॥६२.२८ ॥

वरूथिनी उवाच

प्रसीद यद्ब्रवीषि त्वं तत्करोमि न ते मृषा ।
ब्रवीम्येतदनाशङ्कं यत्ते कार्यं मयाधुना ॥६२.२९ ॥

कलिरुवाच

नाद्य संभोगसमये द्रष्टव्योऽहं त्वया वने ।
निमीलिताक्षयाः संसर्गस्तव सुभ्रु मया सह ॥६२.३० ॥

वरूथिन्युवाच

एवं भवतु भद्रन्ते यथेच्छसि तथास्तु तत् ।
मया सर्वप्रकारं हि वशे स्थेयं तवाधुना ॥६२.३१ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे द्विषष्टितमोऽध्यायः ।

63(60)

त्रिषष्टितमोऽध्यायः- ६३

मार्कण्डेय उवाच

ततः सह तथा सोऽथ रराम गिरिसानुषु ।
फुल्लकाननहृद्येषु मनोज्ञेषु सरःसु च ॥६३.१ ॥

कन्दरेषु च रम्येषु निम्नगापुलिनेषु च ।
मनोज्ञेषु तथान्येषु देशेषु मुदितो द्विज ॥६३.२ ॥

वह्निनाधिष्ठितस्यासीद् यद्रूपन्तस्य तेजसा ।
अचिन्तयद्भोगकाले निमीलितविलोचना ॥६३.३ ॥

ततः कालेन सा गर्भमवाप मुनिसत्तम ।
गन्धर्ववीर्यतो रूपचिन्तनाच्च द्विजन्मनः ॥६३.४ ॥

तां गर्भधारिणीं सोऽथ सान्त्वयित्वा वरूथिनीम् ।
विप्ररूपधरो यातस्तया प्रीत्या विसर्जितः ॥६३.५ ॥

जज्ञे स बालो द्युतिमान ज्वलन्निव विभावसुः ।
स्वरोचिभैर्यथा सूर्यो भासयन् सकला दिशः ॥६३.६ ॥

स्वरोचिभिर्यतो भाति भास्वानिव स बालकः ।
ततः स्वरोचिरित्येवं नाम्ना ख्यातो बभूत सः ॥६३.७ ॥

ववृधे च महाभागो वयसानुदिनन्तथा ।
गुणौघैश्च यथा बालः कलाभिः शशलाञ्छनः ॥६३.८ ॥

स जग्राह धनुर्वेदं वेदांश्चैव यथाक्रमम् ।
विद्याश्चैव महाभागस्तदा यौवनगोचरः ॥६३.९ ॥

मन्दराद्रौ कदाचित् स विचरंश्चारुचेष्टितः ।
ददर्शैकां तदा कन्यां गिरिप्रस्थे भयातुराम् ॥६३.१० ॥

त्रायस्वेति निरीक्षयैनं सा तदा वाक्यमब्रवीत् ।
मा भैषीरिति स प्राह भयविप्लुतलोचनाम् ॥६३.११ ॥

किमेतदिति तेनोक्ते वीरवाक्ये महात्मना ।
ततः सा कथयामास श्वासाक्षेपप्लुताक्षरम् ॥६३.१२ ॥

कन्योवाच

अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥६३.१३ ॥

मन्दारविद्याधरजा सखी मम विभावरी ।
कलावती चाप्यपरा सुता पारस्य वै मुनेः ॥६३.१४ ॥

ताभ्यां सह मया यातं कैलासतटमुत्तमम् ।
तत्र दृष्टो मुनिः कश्चित्तपसातिकृशाकृतिः ॥६३.१५ ॥

क्षुत्क्षामकण्ठो निस्तेजा दूरपाताक्षितारकः ।
मयावहसितः क्रुद्धः स तदा मां शशाप ह ॥६३.१६ ॥

क्षामक्षामस्वरः किञ्चित्कल्पिताधरपल्लवः ।
त्वयावहसितो यस्मादनार्ये दुष्टतापसि ॥६३.१७ ॥

तस्मात् त्वामचिरेणैव राक्षसोऽभिभविष्यसि ।
दत्ते शापे मत्सखीभ्यां स तु निर्भत्सितो मुनिः ॥६३.१८ ॥

धिक् ते ब्राह्मण्यमक्षान्त्या हृतन्ते निखिलन्तपः ।
अमर्षणैर्धर्षितोऽसि तपसा नातिकर्षितः ॥६३.१९ ॥

क्षान्त्यास्पदं वै ब्राह्मण्यं क्रोधसंयमनन्तपः ।
एतच्छ्रुत्वा ददौ शापं तयोरप्यमितद्युतिः ॥६३.२० ॥

एकस्याः कुष्ठमङ्गेषु भाव्यन्यस्यास्तथा क्षयः ।
तयोस्तथैव तज्जातं यथोक्तं तेन तत्क्षणात् ॥६३.२१ ॥

ममाप्येवं महद्रक्षः समुपैति पदानुगम् ।
न शृणोषि महानादं तस्यादूरेऽपि गर्जतः ॥६३.२२ ॥

तृतीयमद्य दिवसं यन्मे पृष्ठन्न मुञ्चति ।
अस्त्रग्रामस्य सर्वस्य हृदज्ञाहमद्य ते ॥६३.२३ ॥

ते प्रयच्छामि मां रक्ष रक्षसोऽस्मान्महामते ।
प्रादात् स्वायम्भुवस्यादौ स्वयं रुद्रः पिनाकधृक् ॥६३.२४ ॥

स्वायम्भुवो वसिष्ठाय सिद्धवर्याय दत्तवान् ।
तेनापि दत्तं मन्मातुः पित्रे चित्रायुधाय वै ॥६३.२५ ॥

प्रादादौद्वाहिकं सोऽपि मत्पित्रे श्वशुरः स्वयम् ।
मयापि शिक्षितं वीर ! सकाशाद् बालया पितुः ॥६३.२६ ॥

हृदयं सकलास्त्राणामशेषरिपुनाशनम् ।
तदिदं गृह्यतां शीघ्रमशेषास्त्रपरायणम् ॥६३.२७ ॥

ततो जहि दुरात्मानमेनं राक्षसमागतम् ॥६३.२८ ॥

मार्कण्डेय उवाच

तथैत्युक्ते ततस्तेन वार्युपस्पृश्य तस्य तत् ।
अस्त्राणां हृदयं प्रादात् सरहस्यनिवर्तनम् ॥६३.२९ ॥

एतस्मिन्नन्तरे रक्षस्तत्तदा भीषणाकृति ।
नर्दमानं महानादमाजगाम त्वरान्वितम् ॥६३.३० ॥

मयाभिभूता किं त्राणमुपैषि द्रुतमेहि मे ।
भक्षामि किञ्चिरेणेति ब्रुवाणं तं ददर्श सः ॥६३.३१ ॥

स्वरोचिश्चिन्तयामास दृष्ट्वा तं समुपागतम् ।
गृह्णात्वेष वचः सत्यं तस्यास्त्विति महामुनेः ॥६३.३२ ॥

जग्राह समुपेत्यैनां त्वरया सोऽपि राक्षसः ।
त्राहि त्राहीति करुणं विलपन्तीं सुमध्यमाम् ॥६३.३३ ॥

ततः स्वरोचिः संक्रुद्धश्चण्डास्त्रमतिभैरवम् ।
दृष्ट्यां निवेश्य तद्रक्षो ददर्शानिमिषेक्षणः ॥६३.३४ ॥

तदाभिभूतः स तदा तामुत्सृज्य निशाचरः ।
प्रसीद शाम्यतामस्त्रं श्रूयताञ्चेत्यभाषत ॥६३.३५ ॥

मोक्षितोषऽहं त्वया शापादतिघोरान्महाद्युते ।
प्रदत्तादतितीव्रेण ब्रह्ममित्रेण धीमता ॥६३.३६ ॥

उपकारी न मे त्वत्तो महाभागाधिकोऽपरः ।
येनाहं सुमहाकष्टान्महाशापाद्विमोक्षितः ॥६३.३७ ॥

स्वरोचिरुवाच

ब्रह्ममित्रेण मुनिना किन्निमित्तं महात्मना ।
शप्तस्त्वं कीदृशश्चैव शापो दत्तोऽभवत् पुरा ॥६३.३८ ॥

राक्षसा उवाच

ब्रह्ममित्रोऽष्टधा भिन्नमायुर्वेदमधीतवान् ।
त्रयोदशाधिकारञ्च प्रगृह्याथर्वणो द्विजः ॥६३.३९ ॥

अहञ्चेन्दीवराख्येति ख्यातोऽस्या जनकोऽभवम् ।
विद्याधरपतेः पुत्रो नलनाभस्य खङ्गिनः ॥६३.४० ॥

मया च याचितः पुर्वं ब्रह्ममित्रोऽभवन्मुनिः ।
आयुर्वेदमशेषं मे भगवन् ! दातुमर्हसि ॥६३.४१ ॥

यदा तु बहुशो वीर ! प्रश्रयावनतस्य मे ।
न प्रादाद्याचितो विद्यामायुर्वेदात्मिकां मम ॥६३.४२ ॥

शिष्येभ्यो ददतस्तस्य मयान्तर्धानगेन हि ।
आयुर्वेदात्मिका विद्या गृहीताभूत्तदानघ ॥६३.४३ ॥

गृहीतायान्तु विद्यायां मासैरष्टाभिरन्तरात् ।
ममातिहर्षादभवद्धासोऽतीव पुनः पुनः ॥६३.४४ ॥

प्रत्यभिज्ञाय मां हासान्मुनिः कोपसमन्वितः ।
विकम्पिकन्धरः प्राह मामिदं परुषाक्षरम् ॥६३.४५ ॥

राक्षसेनैव यस्मान्मे त्वयादृश्येन दुर्मते ।
हृता विद्यावहासश्च मामवज्ञाय वै कृतः ॥६३.४६ ॥

तस्मात्त्वं राक्षसः पाप ! मच्छापेन निराकृतः ।
भविष्यसि न सन्देहः सप्तरात्रेण दारुणः ॥६३.४७ ॥

इत्युक्ते प्रणिपाताद्यैरुपचारैः प्रसादितः ।
स मामाह पुनर्विप्रस्तत्क्षणान्मृदुमानसः ॥६३.४८ ॥

यन्मयोक्तमवश्यन्तद्भावि गन्धर्व ! नान्यथा ।
किन्तु त्वं राक्षसो भूत्वा पुनः स्वं प्राप्स्यसे वपुः ॥६३.४९ ॥

नष्टस्मृतिर्यदा क्रुद्धः स्वमपत्यञ्चिखादिषुः ।
निशाचरत्वं गन्तासि तदस्त्रानलतापितः ॥६३.५० ॥

पुनः संज्ञामवाप्य स्वामवाप्स्यसि निजं वपुः ।
तथैव स्वमधिष्ठानं लोके गन्धर्वसंज्ञिते ॥६३.५१ ॥

सोऽहं त्वया महाभाग ! मोक्षितोऽस्मान्महाभयात् ।
निशाचरत्वाद् यद्वीर ! तेन मे प्रार्थनां कुरु ॥६३.५२ ॥

इमान्ते तनयां भार्यां प्रयच्छामि प्रतीच्छ ताम् ।
आयुर्वेदश्च सकलस्त्वष्टाङ्गो यो मया ततः ।
मुनेः सकाशात् संप्राप्तस्तं गृह्णीष्व महामते ॥६३.५३ ॥

मार्कण्डेय उवाच

इत्युक्त्वा प्रददौ विद्यां स च दिव्याम्बरोज्जवलः ।
स्त्रग्भूषणधरो दिव्यं पुराणं वपुरास्थितः ॥६३.५४ ॥

दत्त्वा विद्यां ततः कन्यां स दातुमुपचक्रमे ।
तमाह सा तदा कन्या जनितारं स्वरूपिणम् ॥६३.५५ ॥

अनुरागो ममाप्यत्र तातातीव महात्मनि ।
दर्शनादेव संजातो विशेषेणोपकारिणि ॥६३.५६ ॥

किन्त्वेषा मे सखी सा च मत्कृते दुः खपीडिते ।
अतो नाभिलषे भोगान् भोक्तुमेतेन वै समम् ॥६३.५७ ॥

पुरुषैरपि नो शक्या कर्तुमित्थं नृशंसता ।
स्वभावरुचिरैर्मादृक् कथं योषित् करिष्यति ॥६३.५८ ॥

साहं यथा ते दुः खार्ते मत्कृते कन्यके पितः ।
तथा स्थास्यामि तद्दुः खे तच्छोकानलतापिता ॥६३.५९ ॥

स्वरोचिरुवाच

आयुर्वेदप्रसादेन ते करिष्ये पुनर्नवे ।
सख्यौ तव महाशोकं समुत्सृज सुमध्यमे ॥६३.६० ॥

मार्कण्डेय उवाच

ततः पित्रा स्वयं दत्तां तां कन्यां स विधानतः ।
उपयेमे गिरौ तस्मिन् स्वरोचिश्चारुलोचवनाम् ॥६३.६१ ॥

दत्तान्तु तां तदा कन्यामभिशान्त्य च भामिनीम् ।
जगाम दिव्यया गत्यागन्धर्वः स्वपुरन्ततः ॥६३.६२ ॥

स चापि सहितस्तन्व्या सदुद्यानन्तदा ययौ ।
कन्यकायुगलं यत्र तच्छापोत्थगदातुरम् ॥६३.६३ ॥

ततस्तयोः स तत्त्वज्ञो रोगघ्नैरौषधै रसैः ।
चकार नीरुजौ देहौ स्वरोचिरपराजितः ॥६३.६४ ॥

ततोऽतिशोभने कन्ये विमुक्ते व्याधितः शुभे ।
स्वकान्त्योद्योति दिग्भागं चक्राते तन्महीधरम् ॥६३.६५ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे त्रिषष्टितमोऽध्यायः

64(61)

चतुः षष्टितमोऽध्यायः- ६४

मार्कण्डेय उवाच

एवं विमुक्तरोगा तु कन्यका तं मुदान्विता ।
स्वरोचिषमुवाचेदं शृणुष्व वचनं प्रभो ॥६४.१ ॥

मन्दारविद्याधरजा नाम्ना ख्याता विभावरी ।
उपकारिन् ! स्वमात्मानं प्रयच्छामि प्रतीच्छ माम् ॥६४.२ ॥

विद्याञ्च तुभ्यं दास्यामि सर्वबूतरुतानि ते ।
ययाभिव्यक्तिमेष्यन्ति प्रसादपुरगो भव ॥६४.३ ॥

मार्कण्डेय उवाच

एवमस्त्विति तेनोक्ते धर्मज्ञेन स्वरोचिषा ।
द्वितीया तु तदा कन्या इदं वचनमब्रवीत् ॥६४.४ ॥

कुमारब्रह्मचार्यासीत् पारो नाम पिता मम ।
ब्रह्मर्षिः सुमहाभागो वेदवेदाङ्गपारगः ॥६४.५ ॥

तस्य पुंस्कोकिलालापरमणीये मधौ पुरा ।
आजगामाप्सराभ्यासं प्रख्याता पुञ्जिकास्तना ॥६४.६ ॥

कामवक्तव्यतां नीतः स तदा मुनिपुङ्गवः ।
तत्संयोगेऽहमुत्पन्ना तस्यामत्र महाचले ॥६४.७ ॥

विहाय मां गता सा च मातास्मिन्निर्जने वने ।
बालामेकां महीपृष्ठे व्यालश्वापदसंकुले ॥६४.८ ॥

ततः कलाभिः सोमस्य वर्धन्तीभिरहः क्षये ।
आप्यायमानाहरहो वृद्धिं यातास्मि सत्तम ॥६४.९ ॥

ततः कलावतीत्येतन्मम नाम महात्मना ।
गृहीतायः कृतं पित्रा गन्धर्वेण शुभानना ॥६४.१० ॥

न दत्ताहं तदा तेन याचितेन महात्मना ।
देवारिणालिना सुप्तस्ततो मे घातितः पिता ॥६४.११ ॥

ततोऽहमतिनिर्वेदादात्मव्यापादनोद्यता ।
निवारिता शम्भुपत्न्या सत्या सत्यप्रतिश्रवा ॥६४.१२ ॥

मा शुचः सुभ्रु ! भर्ता ते महाभागो भविष्यति ।
स्वरोचिर्नाम पुत्रश्च मनुस्तस्य भविष्यति ॥६४.१३ ॥

आज्ञाञ्च निधयः सर्वे करिष्यन्ति तवादृताः ।
यथाभिलषितं वित्तं प्रदास्यन्ति च ते शुभे ॥६४.१४ ॥

यस्या वत्से प्रभावेण विद्यायास्तां गृहाण मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥६४.१५ ॥

इत्याह मां दक्षसुता सती सत्यपरायणा ।
स्वरोचिस्त्वं ध्रुवं देवी नान्यथा सा वदिष्यति ॥६४.१६ ॥

साहं प्राणप्रदायाद्य तां विद्यां स्वं तथा वपुः ।
प्रयच्छामि प्रतीच्छ त्वं प्रसादसुमुखो मम ॥६४.१७ ॥

मार्कण्डेय उवाच

एवमस्त्विति तामाह स तु कन्यां कलावतीम् ।
विभावर्याः कलावत्याः स्निग्धदृष्ट्यानुमोदितः ॥६४.१८ ॥

जग्राह च ततः पाणी स तयोरमरद्युतिः ।
नदत्सु देवतूर्येषु नृत्यन्तीष्वप्सरःसु च ॥६४.१९ ॥

इति श्रीमार्कण्जडेयपुराणेठस्वारोचिषे मन्वन्तरेऽ चतुः
षष्टितमोऽध्यायः

65(62)

पञ्चषष्टितमोऽध्यायः- ६५

मार्कण्डेय उवाच

ततः स ताभिः सहितः पत्नीभिरमरद्युतिः ।
रराम तस्मिन् शैलेन्द्रे रम्यकाननिर्झरे ॥६५.१॥

सर्वोपभोगरत्नानि मधूनि मधुराणि च ।
निधयः समुपाजह्रुः पद्मिन्या वशवर्तिनः ॥६५.२॥

स्त्रजो वस्त्राण्यलङ्कारान् गन्धाढ्यमनुलेपनम् ।
आसनान्यतिशुभ्राणि काञ्चनानि यथेच्छया ॥६५.३॥

सौवर्णानि महाभाग ! करकान् भाजनानि च ।
तथा शय्याश्च विविधा दिव्यैरास्तरणैर्युताः ॥६५.४॥

एवं स ताभिः सहितो दिव्यगन्धाधिवासिते ।
रराम स्वरुचिर्भाभिर्भासिते वरपर्वते ॥६५.५॥

ताश्चापि सह तेनेति लेभिरे मुदमुत्तमाम् ।
रममाणा यथा स्वर्गे तथा तत्र शिलोच्चये ॥६५.६॥

कलहंसी जगादैकां चक्रवाकीं जले सतीम् ।
तस्य तासाञ्च ललिते सम्बन्धे च स्पृहावती ॥६५.७॥

धन्योऽयमतिपुण्योऽयं योऽय यौवनगोचरः ।
दयिताभिः सहैताभिर्भुङ्क्ते भोगानभीप्सितान् ॥६५.८॥

सन्ति यौवनिनः श्लाघ्यास्तत्पत्न्यो नातिशोभनाः ।
जगत्यामल्पकाः पत्न्यः पतयश्चातिशोभनाः ॥६५.९॥

अभीष्टा कस्यचित् कान्ता कान्तः कस्याश्चिदीप्सितः ।
परस्परानुरागाढ्यं दाम्पत्यमतिदुर्लभम् ॥६५.१०॥

धन्योऽयं दयिताभीष्टो ह्येताश्चास्यातिवल्लभाः ।
परस्परानुरागो हि धन्यानामेव जायते ॥६५.११ ॥

एतन्निशम्यवचनं कलहंसीसमीरितम् ।
उवाच चक्रवाकी तां नातिविस्मितमानसा ॥६५.१२ ॥

नायं धन्यो यतो लज्जा नान्यस्त्रीसन्निकर्षतः ।
अन्यां स्त्रियमयं भुङ्क्ते न सर्वास्वस्य मानसम् ॥६५.१३ ॥

चित्तानुराग एकस्मिन्नधिष्ठाने यतः सखि ।
ततो हि प्रीतिमानेष भार्यासु भविता कथम् ॥६५.१४ ॥

एता न दयिताः पत्युर्नैतासां दयितः पतिः ।
विनोदमात्रमेवैता यथा परिजनोऽपरः ॥६५.१५ ॥

एतासाञ्च यदिष्टोऽयं तत् किं प्राणान्न मुञ्चति ।
आलिङ्गत्यपरां कान्तां ध्यातो वै कान्तयान्यया ॥६५.१६ ॥

विद्याप्रदानमूल्येन विक्रीतो ह्येष भृत्यवत् ।
प्रवर्तते न हि प्रेम समं बह्वीषु तिष्ठति ॥६५.१७ ॥

कलहंसि ! पतिर्धन्यो मम धन्याहमेव च ।
यस्यैकस्याश्चिरं चित्तं यस्याश्चैकत्र संस्थितम् ॥६५.१८ ॥

सर्वसत्त्वरुतज्ञोऽसौ स्वरोचिरपराजितः ।
निशम्य लज्जितो दध्यौ सत्यमेव हि नानृतम् ॥६५.१९ ॥

ततो वर्षशते याते रममाणो महागिरौ ।
रममाणः समं ताभिर्ददर्श पुरतो मृगम् ॥६५.२० ॥

सुस्निग्धपीनावयवं मृगयूथविहारिणम् ।
वासिताभिः सुरूपाभिर्मृगीभिः परिवारितम् ॥६५.२१ ॥

आकृष्टघ्राणपुटका जिघ्रन्तीस्तास्ततो मृगीः ।
उवाच स मृगो रामा लज्जात्यागेन गम्यताम् ॥६५.२२ ॥

नाहं स्वरोचिस्तच्छीलो न चैवाहं सुलोचनाः ।
निर्लज्जा बहवः सन्ति तादृशास्तत्र गच्छत ः ॥६५.२३ ॥

एका त्वनेकानुगता यथा हासास्पदं जने ।
अनेकाभिस्तथैवैको बोगदृष्ट्या निरीक्षितः ॥६५.२४ ॥

तस्य धर्मक्रियाहानिरहन्यहनि जायते ।
सक्तोऽन्यभार्यया चान्यकामासक्तः सदैव सः ॥६५.२५ ॥

यस्तादृशोऽन्यस्तच्छीलः परलोकपराङ्मुखः ।
तं कामयत भद्रं वो नाहं तुल्यः स्वरोचिषा ॥६५.२६ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे पञ्चषष्टितमोऽध्यायः

Æञ्ःâå>üúåßज्ञादादनागतम् ।
यथाहं समतीतञ्च वर्तमानञ्च सर्वतः ॥६९.५३ ॥

आलोच्याज्ञापयेत्युक्ते ततो ज्ञातं मयापि तत् ।
ततो न दत्तवानर्घमहं तुभ्यं विधानतः ॥६९.५४ ॥

सत्यं राजन् ! त्वमर्घार्हः कुले स्वायम्भुवस्य च ।
तथापि नार्घयोग्यं त्वां मन्यामो वयमुत्तमम् ॥६९.५५ ॥

राजोवाच

किं कृतं हि मया ब्रह्मन् ! ज्ञानादज्ञानतोऽपि वा ।
येन त्वत्तोर्ऽघमर्हामि नाहमभ्यागतश्चिरात् ॥६९.५६ ॥

ऋषिरुवाच

किं विस्मृतन्ते यत्पत्नी त्वया त्यक्ता च कानने ।
परित्यक्तस्तया सार्धं त्वया धर्मो नृपाखिलः ॥६९.५७ ॥

पक्षेण कर्मणो हान्या प्रयात्यस्पर्शतां नरः ।
विण्मूत्रैर्वार्षिकी यस्य हानिस्ते नित्यकर्मणः ॥६९.५८ ॥

पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्तरि ।
दुः शीलापि तथा भार्या पोषणीया नरेश्वर ॥६९.५९ ॥

प्रतिकूला हि सा पत्नी तस्य विप्रस्य या हृता ।
तथापि धर्मकामोऽसौ त्वामुद्योतितवान् नृप ॥६९.६० ॥

चलतः स्थापयस्यन्यान् स्वधर्मेषु महीपते ।
त्वां स्वधर्मादविचलितं कोऽपरः स्थापयिष्यति ॥६९.६१ ॥

मार्कण्डेय उवाच

विलक्षयः स महीपाल इत्युक्तस्तेन धीमता ।
तथेत्युक्त्वा च पप्रच्छ हृतां पत्नीं द्विजन्मनः ॥६९.६२ ॥

भगवन् ! केन नीता सा पत्नी विप्रस्य कुत्र वा ।
अतीतानागतं वेत्ति जगत्यवितथं भवान् ॥६९.६३ ॥

ऋषिरुवाच

तां जहारादिरतनयो बलाको नाम राक्षसः ।
द्रक्षयसे चाद्य तां भूप ! उत्पलावतके वने ॥६९.६४ ॥

गच्छ संयोजयाशु त्वं भार्यया हि द्विजात्तमम् ।
मा पापास्पदतां यातु त्वमिवासौ दिने दिने ॥६९.६५ ॥

इति श्रीमार्कण्डेयपुराणे औत्तममन्वन्तरे एकोनसप्ततितमोऽध्यायः

70(67)

सप्ततितमोऽध्यायः- ७०

मार्कण्डेय उवाच

अथारुरोह स्वरथं प्रणिपत्य महामुनिम् ।
तेनाख्यातं वनन्तच्च प्रययावुत्पलावतम् ॥७०.१ ॥

यथाख्यातस्वरूपाञ्च भार्यां भर्त्रा द्विजस्य ताम् ।
भक्षयन्तीं ददार्शाथ श्रीफलानि नरेश्वरः ॥७०.२ ॥

पप्रच्छ च कथं भद्रे ! त्वमेतद्वनमागता ।
स्फुटं ब्रवीहि वैशालेरपि भार्या सुशर्मणः ॥७०.३ ॥

ब्राह्मण्युवाच

सुताहमतिरात्रस्य द्विजस्य वनवासिनः ।
पत्नी विशालपुत्रस्य यस्य नाम त्वयोदितम् ॥७०.४ ॥

साहं हृता बलाकेन राक्षसेन दुरात्मना ।
प्रसुप्ता भवनस्यान्ते भ्रातृमातृवियोजिता ॥७०.५ ॥

भस्मीभवतु तद्रक्षो येनास्म्येवं वियोजिता ।
मात्रा भ्रातृभिरन्यैश्च तिष्टाम्यत्र सुदुः खिता ॥७०.६ ॥

अस्मिन् वनेऽतिगहने तेनानीयाहमुज्झिता ।
न वेद्मि कारणं कि तन्नोपभुङ्क्ते न खादति ॥७०.७ ॥

राजोवाच

अपि तज्ज्ञायते रक्षस्त्वामुत्सृज्य क्व वै गतम् ।
अहं भर्त्रा तवैवात्र प्रेषितो द्विजनन्दिनि ॥७०.८ ॥

ब्राह्मण्युवाच

अस्यैव काननस्यान्ते स तिष्ठति निशाचरः ।
प्रविश्य पश्यतु भवान् न बिभेति ततो यदि ॥७०.९ ॥

मार्कण्डेय उवाच

प्रविवेश ततः सोऽथ तया वर्त्मनि दर्शिते ।
ददृशे परिवारेण समवेतञ्च राक्षसम् ॥७०.१० ॥

दृष्टमात्रे ततस्तस्मिन् त्वरमाणः स राक्षसः ।
दूरादेव महीं मूर्ध्ना स्पृशन् पादान्तिकं ययौ ॥७०.११ ॥

राक्षस उवाच

ममात्रागच्छता गेहं प्रसादस्ते महान् कृतः ।
प्रशाधि किं करोम्येष वसामि विषये तव ॥७०.१२ ॥

अर्घञ्चेमं प्रतीच्छ त्वं स्थीयताञ्चेदमासनम् ।
वयं भृत्या भवान् स्वामी दृढमाज्ञापयस्व माम् ॥७०.१३ ॥

राजोवाच

कृतमेव त्वया सर्वं सर्वामेवातिथिक्रियाम् ।
किमर्थं ब्राह्मणवधूस्त्वयानीता निशाचर ॥७०.१४ ॥

नेयं सुरूपा सन्त्यन्या भार्यार्थञ्चेद् हृता त्वया ।
भक्षयार्थं चेत्कथं नात्ता त्वयैतत्कथ्यतां मम ॥७०.१५ ॥

राक्षस उवाच

न वयं मानुषाहारा अन्ये ते नृप ! राक्षसाः ।
सुकृतस्य फलं यत्तु तदश्नीमो वयं नृप ॥७०.१६ ॥

स्वभावञ्च मनुष्याणां योषिताञ्च विमानिताः ।
मानिताश्च समश्नीमो न वयं जन्तुखादकाः ॥७०.१७ ॥

यदस्माभिर्नृणां क्षान्तिर्भुक्ता क्रुध्यन्ति ते तदा ।
भुक्ते दुष्टे स्वभावे च गुणवन्तो भवन्ति च ॥७०.१८ ॥

सन्ति नः प्रमदा भूप ! रूपेणाप्सरसां समाः ।
राक्षस्यस्तासु तिष्ठत्सु मानुषीषु रतिः कथम् ॥७०.१९ ॥

राजोवाच

यद्येषा नोपभोगाय नाहाराय निशाचर ।
गृहं प्रविश्य विप्रस्य तत्किमेषा हृता त्वया ॥७०.२० ॥

राक्षस उवाच

मन्त्रवित् स द्विजश्रेष्ठो यज्ञे यज्ञे गतस्य मे ।
रक्षोघ्नमन्त्रपठनात् करोत्युच्चाटनं नृप ॥७०.२१ ॥

वयं बुभुक्षितास्तस्य मन्त्रोच्चाटनकर्मणा ।
क्क यामः सर्वयज्ञेषु स ऋत्विग् भवति द्विजः ॥७०.२२ ॥

ततोऽस्माभिरिदन्तस्य वैकल्यमुपपादितम् ।
पत्न्या विना पुमानिज्याकर्मयोग्यो न जायते ॥७०.२३ ॥

मार्कण्डेय उवाच

वैकल्योच्चारणात्तस्य ब्राह्मणस्य महामतेः ।
ततः स राजातिभृशं विषण्णः समजायत ॥७०.२४ ॥

वैकल्यमेवं विप्रस्य वदन्मामेव निन्दति ।
अनर्हमर्घस्य च मां सोऽप्याह मुनिसत्तमः ॥७०.२५ ॥

वैकल्यं तस्य विप्रस्य राक्षसोऽप्याह मे यथा ।
अपत्नीकतया सोऽहं सङ्कटं महदास्थितः ॥७०.२६ ॥

मार्कण्डेय उवाच

एवं चिन्तयतस्तस्य पुनरप्याह राक्षसः ।
प्रणामनम्रो राजानं बद्धाञ्जलिपुटो मुने ॥७०.२७ ॥

नरेन्द्राज्ञाप्रदानेन प्रसादः क्रियतां मम ।
भृत्यस्य प्रणतस्य त्वं युष्मद्विषयवासिनः ॥७०.२८ ॥

राजोवाच

स्वभावं वयमश्नीमस्त्वयोक्तं यन्निशाचर ।
तदर्थिनो वयं येन कार्येण शृणु तन्मम ॥७०.२९ ॥

अस्यास्त्वयाद्य ब्राह्मण्या दौः शील्यमुपभुज्यताम् ।
येन त्वयात्तदौः शील्या तद्विनीता भवेदियम् ॥७०.३० ॥

नीयतां यस्य भार्येयं तस्य वेश्म निशाचर ।
अस्मिन् कृते कृतं सर्वं गृहमभ्यागतस्य मे ॥७०.३१ ॥

मार्कण्डेय उवाच

ततः स राक्षसस्तस्याः प्रविश्यान्तः स्वमायया ।
भक्षयामास दौः शील्यं निजशक्त्या नृपाज्ञया ॥७०.३२ ॥

दौः शील्येनातिरौद्रेण पत्नी तस्य द्विजन्मनः ।
तेन सा संपरित्यक्ता तमाह जगतीपतिम् ॥७०.३३ ॥

स्वकर्मफलपाकेन भर्तुस्तस्य महात्मनः ।
वियोजिताहं तद्धेतुरयमासीन्निशाचरः ॥७०.३४ ॥

नास्य दोषो न वा तस्य मम भर्तुर्महात्मनः ।
ममैव दोषो नान्यस्य सुकृतं ह्युपभुज्यते ॥७०.३५ ॥

अन्यजन्मनि कस्यापि विप्रयोगः कृतो मया ।
सोऽयं ममाप्युपगतः को दोषोऽस्य महात्मनः ॥७०.३६ ॥

राक्षस उवाच

प्रापयामि तवादेशादिमां भर्तृगृहं प्रभो ।
यदन्यत्करणीयन्ते तदाज्ञापय पार्थिव ॥७०.३७ ॥

राजोवाच

अस्मिन् कृते कृतं सर्वं त्वया मे रजनीचर ।
आगन्तव्यञ्च ते वीर ! कार्यकाले स्मृतेन मे ॥७०.३८ ॥

मार्कण्डेय उवाच

नथेत्युक्त्का तु तद्रक्षस्तामादाय द्विजाङ्गनाम् ।
निन्ये भर्तृगृहं शुद्धां दौः शोल्यापगमात्तदा ॥७०.३९ ॥

इति श्रीमार्कण्डेयपुराणे औत्तममन्वन्तरे सप्ततितमोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium